# Phase-IV

**संक्षिप्तप्रतिवेदनम्, कार्यक्रम-02**

**त्रिदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

## अभिकल्पन एवं विकास : ऑडियो एवं वीडियो ई-संसाधन

## (Design & Develop : Text and Image e-Resources)

26-28 मई 2020 पर्यन्तम्

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षण-मिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **अभिकल्पन एवं विकास ऑडियो एवं वीडियो ई-संसाधन** इति विषये द्वितीय-त्रिदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2020 तमवर्षस्य मईमासस्य षड्विंशतितमदिनाङ्कात् मईमासस्य अष्टाविंशतितमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनाम् ऑडियो-वीडियो-निर्माणः सम्पादनं च सम्बद्धानि विविधानि एप्पस-सॉफ्टवेयर- उपकरणानां परिचयप्रदानम् तथा च प्रक्रियाणां सम्बद्धकुशलतानां विकासः। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणाम्** अध्यक्षीय-उद्बोधनम् जातम् तथा च **प्रो. के. भरतभूषणवर्येण** (शिक्षासङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन सत्रसम्पन्नम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 12 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन- अष्टप्रदर्शनाधारिततकनीकी- त्रीणि प्रश्नोत्तरसत्रम्, स्वाभ्यास-ऑनलाइनमाकलन- प्रतिपुष्टि-अनुभवकथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 511 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु मञ्चस्य सीमा प्रवेशक्षमतायाश्च कारणेन 241 प्रतिभागिनः कार्यशालायाम् आमन्त्रिताः। 209 **प्रतिभागिभिः** कार्यशाला कृता, 29 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं कर्तुं न शक्तवन्तः। भारतस्य 20 राज्येभ्यः 212 प्रतिभागिनः आसन्। यस्याम् आन्ध्रप्रदेशतः 05, असमतः 02, बिहारतः 08, छत्तीसगढ़तः 03, गुजराततः 03, हरियाणातः 13, हिमाचलतः 06, झारखण्डतः 02, कर्नाटकतः 04, केरलतः 06, मध्यप्रदेशतः 07, महाराष्ट्रतः 16, ओडिशातः 06, पंजाबतः 04, राजस्थानतः 14, तमिलनाडुतः 04, त्रिपुरातः 05, उत्तराखण्डतः 10, उत्तरप्रदेशतः 52, पश्चिमबंगालतः 09, 02 केन्द्रशासितप्रदेशेभ्यः चण्डीगढ़तः 03, दिल्लीतः 37 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानाम् **षण्णां विशेषज्ञानां** कुशलमार्गदर्शने जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- शिक्षण एवं ई-संसाधनाय रोडमैप, विविधाः सॉफ्टवेयर-मोबाइलएप्पस्द्वारा वीडियोनिर्माणं यथा- स्क्रीनकास्टीफाई- स्क्रीनकास्ट- ओ-मेटिक, प्रेजेंटेशनट्यूब-फ्रीकैम एवं ए-जैडरिकार्डर, ओपनशोटद्वारा वीडियो-सम्पादन- पॉडकास्टद्वारा ऑडियोनिर्माणः ऑडेसिटीद्वारा ऑडियो-सम्पादनं च। आकलनाय ऑनलाइनपरीक्षणम् अपि प्रशासितम्। तेषु 43% प्रतिभागिनः 60 **प्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम् तथा च तेषां औसतम् 65% 28% 06% एवं 01% क्रमशः श्रेणीषु प्राप्ताः। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एते 10 बिन्दूनां प्राप्तश्रेण्यां औसतप्रतिशते 66% **उत्कृष्टम्**, 29% **अति-उत्तमम्**, 05% **उत्तमम्**, 01% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **प्रो. संतोषकुमारशुक्लमहोदयानां** (संकायप्रमुखः, संस्कृतप्राच्यविद्या-अध्ययनसंस्थानम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।